# Mahishamardini Kavacham

# મહિષમર્દિની કવચમ્

## Document Information

Text title : Mahishamardini Kavacham

File name : mahiShamardinIkavacham.itx

Category : devii, kavacha, durgA

Location : doc_devii

Transliterated by : Mohan Chettoor

Proofread by : Mohan Chettoor

Latest update : August 10, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 10, 2022

*sanskritdocuments.org*

# મહિષમર્દિની કવચમ્

અથ વક્ષ્યે મહેશાનિ કવચં સર્વકામદમ્ । (મહાદેવી)
યસ્ય પ્રસાદમાસાદ્ય ભવેત્ સાક્ષાત્ સદાશિવઃ ॥ ૧॥

ૐકારં પૂર્વમુચ્ચાર્ય મન્ત્રી મન્ત્રસ્ય સિદ્ધયે ।
પ્રપઠેત્ કવચં નિત્યં મન્ત્રવર્ણસ્ય સિદ્ધયે ॥ ૨॥

વિનિયોગઃ-
ૐ મહિષમર્દિન્યાઃ કવચસ્ય ભગવાન્મહાકાલઋષિઃ
અનુષ્ટુપ્ છન્દઃ, આદ્યાશક્તિઃ, મહિષમર્દિની દેવતા,
ચતુર્વર્ગફલાપ્ત્યર્થે વિનિયોગઃ ॥

ક્લીં પાતુ મસ્તકે દેવી કામિની કામદાયિની ।
મકારે પાતુ માં દેવી ચક્ષુર્યુગ્મં મહેશ્વરી ॥ ૩॥

હિકારે પાતુ વદને હિઙ્ગુલા-સુર -નાયિકા ।
શકારે પાતુ માં શ્વેતા જિહ્વાયાં ચાપરાજિતા ॥ ૪॥ ત્વપરાજિતા)

મકારે પાતુ માં દેવી મર્દિની સુરનાયિકા ।
દિકારે પાતુ માં દેવી સાવિત્રી ફલદાયીની ॥ ૫॥ (સાવિત્રી કાલનાશિની)

નિકારે પાતુ માં નિત્યા હૃદયે વાસપાર્શ્વયોઃ ।
નાભૌ લિઙ્ગે ગુદે કણ્ઠે કર્ણયોસ્પૃષ્ટયોસ્તથા ॥ ૬॥ (કર્ણયોઃ પાર્શ્વયોસ્તથા)

શિખાયાં કવચે પાતુ મુશ્વજઙ્ઘાયુગે તથા ।
સર્વાઙ્ગે પાતુ માં સ્વાહા સર્વશક્તિસમન્વિતા ॥ ૭॥

કામાદ્યા પાતુ માં સ્વાહા સર્વાઙ્ગે પાતુ મર્દિની ।
દશાક્ષરી મહાવિદ્યા સર્વાઙ્ગે પાતુ મર્દિની ॥ ૮॥

મર્દિની પાતુ સતતં મર્દિની રક્ષયેત્ સદા ।
રાજસ્થાને તથા દુર્ગે સિંહવ્યાઘ્રભયાદિષુ ॥ ૯॥

શ્મશાને પ્રાન્તરે દુર્ગે નૌકાયાં વહ્નિમધ્યતઃ ।
દુર્ગા પાતુ સદા દેવી આર્યા પાતુ સદાશિવા ॥ ૧૦॥

પ્રભા પાતુ મહેશાની ગગને પાતુ સર્વદા । (કનકા પાતુ)
નન્દિની પાતુ સતતં મુદ્રાઃ પાતુ સદા મમ ।
કૃત્તિકા પાતુ સતતમભયા સર્વદાઽવતુ ॥ ૧૧॥

પ્રભા પાતુ મહામાયા માયા પાતુ સદા મમ ।
નન્દિની પાતુ સતતં સુપ્રભા સર્વદાઽવતુ ॥ ૧૨॥

વિજયા પાતુ સર્વત્ર દેવ્યઙ્ગે નવશક્તયઃ ।
શક્તયઃ પાતુ સતતં મુદ્રાઃ પાતુ સદા મમ ॥ ૧૩॥

જયા પાતુ સદા સૂક્ષ્મા વિશુદ્ધા પાતુ સર્વદા । (સદા લક્ષ્મી)
ડાકિન્યાઃ પાતુ સતતં સિદ્ધાઃ પાતુ સદા મમ ॥ ૧૪॥

સર્વત્ર સર્વદા પાતુ દેવી મહિષમર્દિની ।
ઇતિ તે કવચં દિવ્યં કથિતં સર્વકામદમ્ ॥ ૧૫॥

યત્ર તત્ર ન વક્તવ્યં ગોપિતવ્યં પ્રયત્નતઃ ।
ગોપિતં સર્વતન્ત્રેષુ વિશ્વસારે પ્રકાશિતમ્ ॥ ૧૬॥

સર્વત્ર સુલભા વિદ્યા કવચં દુર્લભં મહત્ ॥ ।

શઠાય ભક્તિહીનાય નિન્દકાય મહેશ્વરિ ॥ ૧૭॥

ન્યૂનાઙ્ગે હ્યતિરિક્તાઙ્ગે ક્રૂરે મિથ્યાતિભાષિણિ ।
ન સ્તવં દર્શયેદ્દિવ્યં કવચં સુરદુર્લભમ્ ॥ ૧૮॥

યત્ર તત્ર ન વક્તવ્યં શઙ્કરેણ ચ ભાષિતમ્ ।
દત્ત્વા તેભ્યો મહેશાનિ નશ્યન્તિ સિદ્ધયઃ ક્રમાત્ ॥ ૧૯॥

મન્ત્રાઃ પરાઙ્મુખા યાન્તિ શાપં દત્ત્વા સુદારુણમ્ ।
અશુભં ચ ભવેત્તસ્ય તસ્માદ્યત્નેન ગોપયેત્ ॥ ૨૦॥

ગોરોચના કુકુમેન ભૂર્જપત્રે મહેશ્વરિ ।
લિખિત્વા શુભયોગેન બ્રાહ્મૈન્દ્રે વૈધૃતૌ તથા ॥ ૨૧॥

આયુષ્મત્સિદ્ધિયોગે ચ બાલવે કૌલવેપિ વા ।
વાણિજે શ્રવણાયાં ચ રેવત્યાં વા પુનર્વસૌ ॥ ૨૨॥

ઉત્તરાત્રયયોગેષુ તથા પૂર્વાત્રયેષુ ચ ।
અશ્વિન્યાં વાઽથ રોહિણ્યાં તૃતીયા-નવમીતિથૌ ॥ ૨૩॥

અષ્ટમ્યાં વા ચતુર્દશ્યાં ષષ્ઠ્યાં વા પઞ્ચમીતિથૌ ।
અમાયાં વા પૂર્ણિમાયાં નિશાયાં પ્રાન્તરે તથા ॥ ૨૪॥

એકલિઙ્ગે શ્મશાને ચ શૂન્યાગારે શિવાલયે ।
ગુરુણાં વૈષ્ણવૈર્વાપિ સ્વયમ્ભૂ કુસુમૈસ્તથા ॥ ૨૫॥

શુક્લૈર્વા રક્તકુસુમૈશ્ચન્દનૈ રક્તસંયુતૈઃ । (
શવાઙ્ગારચિતાવસ્ત્રે લિખિત્વા ધારયેત્પુનઃ ॥ ૨૬॥

તસ્ય સર્વાર્થસિદ્ધિઃ સ્યાચ્છઙ્કરેણૈવ ભાષિતમ્ ।
કુમારીં પૂજયિત્વા ચ દેવીસૂક્તં નિવેદ્ય ચ ॥ ૨૭॥

પઠિત્વા પૂજયેદ્વિપ્રાન્ધનવાન્વેદ પારગાન્ ।
આખેટકમુપાખ્યાનં કુમાર્યૈવ દિનત્રયમ્ ॥ ૨૮॥

તદા ધરેન્મહારક્ષાં કવચં સર્વકામદમ્ । (તદા ભવેન્)
નાધયો વ્યાધયસ્તસ્ય દુઃખશોકૈર્ભયં ક્વચિત્ ॥ ૨૯॥

વાદી મૂકો ભવેદૃષ્ટ્વા રાજા ચ સેવકાયતે ।
માસમેકં પઠેદ્યસ્તુ પ્રત્યહં નિયતઃ શુચિઃ ॥ ૩૦॥

દિવા ભવેદ્હવિષ્યાશી રાત્રૌ શક્તિઃ પરાયણઃ ।
ષટ્સહસ્ર પ્રમાણેન પ્રત્યહં પ્રજપેત્સદા ॥ ૩૧॥

ષણ્માસૈર્વા ત્રિભિર્માસૈર્વિદ્ધરો ભવતિ ધ્રુવમ્ ।
અપુત્રો લભતે પુત્રં નિર્ધનો ધનમાપ્નુયાત્ ॥ ૩૨॥

અરોગી બલવાંશ્ચૈવ રાજા તા દાસતામિયાત્ ।
રજસ્વલાભગે નિત્યં જપેદ્વિદ્યાં સમાહિતઃ ।
એવં યઃ કુરુતે ધીમાન્સ એવં શ્રીસદાશિવઃ ॥ ૩૩॥

(આગમકલ્પલતા ૧૫-૩૧૭) ॥

ઇતિ વિશ્વસારતન્ત્રે મહિષમર્દિન્યાં કવચં સમાપ્તમ્ ॥

Edited and proofread by Mohan Chettoor

*Mahishamardini Kavacham*

pdf was typeset on August 10, 2022

Please send corrections to *sanskrit@cheerful.com*